International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 85-89
© 2022 IJSR
www.anantaajournal.com
Received: 06-07-2022
Accepted: 09-08-2022

**परमार विनोदकुमार**
शोधच्छात्रः, कर्नाटक-संस्कृत-विश्वविद्यालयः, बेंगलूरु, कर्नाटक, भारत

**Corresponding Author:**
**परमार विनोदकुमार**
शोधच्छात्रः, कर्नाटक-संस्कृत-विश्वविद्यालयः, बेंगलूरु, कर्नाटक, भारत

# श्रीमद्भागवतमहापुराणान्तरगतं श्रीवेदस्तुतेः व्याख्यानपरम्परा

## परमार विनोदकुमार

### प्रस्तावना

पुराणेतिहासकाव्यत्मके सकलसंस्कृतवाङ्मये अनन्यं महारत्नं श्रीमद्भागवतम् । अष्टादशपुराणेषु श्रीमद्भागवतं स्वप्रतिपाद्यगौरवेण, सकलपुराणानां सारसङ्ग्रहमिति कारणात् मूर्धन्यमिति विख्यातम् । यादृशी प्रसिद्धिः श्रीमद्भागवतस्याऽस्ति, यावती रुचिश्च समवलोक्यते, तादृशी प्रसिद्धिः तावती रुचिश्च नान्यस्य कस्यचिदपि पुराणस्योपपुराणस्य वाऽस्ति । श्रीमद्भागवतपुराणस्य यावन्प्रचारः भारतीयसमाजेषु वर्तते, तावन् प्रचारः कस्यापि अन्यस्य पुराणस्य नास्ति । न हि श्रीमद्भागवतं महापुराणं सर्वेभ्यः पुराणेभ्यः सरलं वर्तते इति वक्तुं शक्यते, साधारणज्ञानवतां सुलभज्ञेयमिव भासमानमिदं पुराणं सकलागमनिस्यन्दरूपं सत्विदुषामपि यत्नसाध्यबोधं भवति । अत एव "विद्यावतां भागवते परीक्षा" इति सर्वत्र विद्वत्समाजे प्रसिद्धम् –

> धनञ्जये हाटकसंपरीक्षा महारणे शस्त्रभृतां परीक्षा ।
> विपत्तिकाले गृहीणी परीक्षा विद्यावतां भागवते परीक्षा ।।

सर्वसाधारणेन वाचकेन वाच्यमानं, पाठकेन पठ्यमानमपि बहुषु विषये ज्ञानिनां विदुषामपि बुद्धिः भ्राम्यति, तावद्विद्वत्पूर्णमेतत्पुराणम् । विद्वत्तापूर्णत्वेऽपि अस्य पुराणस्य सरसता मधुरता साहित्यरसिकान् भक्तांश्च सम्मोहं करोति । न केवलं संस्कृतवाङ्मये अपि तु समग्रेषु धार्मिकाध्यात्मिकेषु च साहित्येषु पुराणमिदं श्रेष्ठत्वमर्हति । उक्तं च स्कान्दपुराणे –

> श्रीमद्भागवतस्याथ श्रीमद्भगवतः सदा ।
> स्वरूपमेकमेवास्ति सच्चिदानन्दलक्षणम् ।।
> ज्ञानविज्ञानभक्त्यङ्गचतुष्टयपरं वचः ।
> मायामर्दनदक्षश्च विद्धि भागवतं च तत् ।।
> ग्रन्थोऽष्टादशसाहस्रो योऽसौ भागवताभिधः ।
> कलिग्राहगृहीतानां स एव परमाश्रयः ।।

कृष्णप्राप्तिकरं शश्वत् प्रेमानन्दफलप्रदम् ।
श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ।।[i]

**निर्वचनम्**

भगशब्दात् भूमार्थे, प्रशंसार्थे, नित्ययोगार्थे अतिशयार्थे वा 'मतुप्' । एवं विधात् भगवच्छब्दात् भगवद्विषयकमित्यर्थे 'तस्येदमित्यण्' । ऐश्वर्यादि षण्णां गुणानां 'भग' इति संज्ञा । भगवद्विषयकमहिमाप्रतिपादकः इति यावत् –

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसस्श्रियः ।
ज्ञानवैराग्योश्चैव षण्णां भग इतीरितः ।। [ii]

अपि च भगवति भक्ताः भागवताः, भागवतानां कथा भागवतम् इति द्विधा भागवतशब्दार्थः । भगवन्महिमाप्रतिपादककथामनुसृत्य कृतं पुराणं भागवतमिति प्रथमम्, भागवतानां कथाः अनुसृत्य कृतं पुराणं भागवतम् इति द्वितीयं सार्थकं नाम ग्रन्थस्य सिध्यति । श्रीमद्भागवतमिति पुराणस्यास्य नामकरणस्य विषये कौशितकीसंहितयामेवमुक्तम् – भागवते चत्वार्यक्षराणि सन्ति । भा इति कीर्तिः, ग इति ज्ञानं, व इति सर्वाभीष्टत्वं, त इति शब्दं विस्तारकस्य निर्वचनं वक्ति । भक्तजनेभ्यो लौकिककीर्तेः, ज्ञानस्य सर्वाभीष्टार्थस्य च विस्तरणपूर्वकं मुक्तिदायी भवति भागवतमित्याशयः –

भाशब्दः कीर्त्तिवचनो गशब्दो ज्ञानवाचकः ।
सर्वेष्टवचनो वश्च तविस्तारस्य वाचकः ।।
कीर्तेर्ज्ञानस्य सर्वेष्टस्य च विस्तरणादिकम् ।
अस्य भागवतं नाम श्रीव्यासेनेतिकीर्तितम् ।। [iii]

उक्तमन्यत्रश्च –

भक्तिर्ज्ञानश्च वैराग्यं तत्त्वं मोक्षश्च यत्र हि ।
क्षोदक्षमं निरूप्यन्ते तद्वै भागवतं स्मृतम् ।। [iv]

अयमक्षरसङ्केतात्मक: श्लोकोक्तरीत्या – भकारो भक्तिं, गकारः ज्ञानं, वकारो वैराग्यं, तकारस्तत्त्वं, मकारो मोक्षश्च सूचयन्ति । अर्थात् भक्तिज्ञानवैराग्यतत्त्वमोक्षाणां सम्यगवबोधकमिदं पुराणमिति । श्रीमद्भागवते एव उक्तं यत् –

इदं भागवतं नाम यन्मे भगवतोदितम् ।[v]

इत्यादिवचनानुसारेण अस्य पुराणस्य कर्तृः स्वयं भगवानेव। कृष्णावतारस्य अन्तिमे काले भगवता श्रीकृष्णेन स्वयं भागवतसंज्ञा विवृता –

वेदाहमन्तर्मनसीप्सितं मे ददामि यत्तद्दुरवापमन्यैः ।
सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः ।।
स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत् ।
यन्मां नृलोकान् रह उत्सृजन्तं दिष्ट्या दद्दृश्वान्विशदानुवृत्या ।।
पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ।
ज्ञानं परं यन्महिमावभासं यत्सूरयो भागवतं वदन्ति।।[vi]

स्वयं भगवता कथितत्वात्, विविधविषयैः तेन सम्बद्धत्वादस्य 'भागवतम्' इति नामकरणं सूक्तमस्ति । एतद् भागवतज्ञानं सर्वप्रथमं भगवता ब्रह्मणे दत्तं, ब्रह्मणा नारदाय दत्तं, नारदेन च पुनः वेदव्यासाय दत्तं, तेन इदं ज्ञानं स्वपुत्राय शुकाय दत्तं, शुकेन च इदं राजा परिक्षिते श्रावितं, तत्पश्चात् व्यासशिष्येण सूतेन शौनकादिभ्यः श्रावितमिति कथा वर्तते । तत्र प्रारम्भे भगवता ब्रह्मणे चतुःश्लोकात्मकं भागवतमेव दत्तम् । परन्तु कालस्य क्रमिकविकासक्रमे एतद् पुराणं विस्तृतमभवत् ।

**श्रीमद्भावतस्य व्याख्याः**

सकलोपनिषत्सारभूतमिदं श्रीमद्भागवतमतीवं जनप्रियमसाधारण-ख्यातिभाक् च । इदं भक्ति-ज्ञान-योगादीनां त्रिवेणीति कथ्यते, यत्र स्नात्वा साधकाः कृतकृत्यः भवन्ति । श्रीमद्भागवते समेषां शास्त्राणां समावेशात् तत्सम्यग्ज्ञानाय सर्वशास्त्रपारगत्वमत्यावश्यकम् । अतः सर्वसाधारणजनानां कृतेऽस्य तत्त्वावबोधये विद्वत्वरेण्यैः विफुलव्याख्यानग्रन्थाः विरचिताः । तस्मादेव नानामतप्रकार-सम्प्रदायानुसारिणः महान्तो विद्वांसाः व्याख्यातारः स्वस्वमतस्य प्रतिष्ठापनार्थं श्रीभागवतस्य विविधव्याख्यानानि आरचयन् । एवं भागवतव्याख्यापरम्परा अतिसमृद्धा अजायत । अद्य यावत् भागवतसम्बन्धिन्यः विविधव्याख्याः ग्रन्थाश्च षट्त्रिंशदुत्तरैकशतसंख्याका (१३६) अपि अधिका इति

विदुषाणामभिप्रायः । तेषु श्रीमद्भागवतस्य सुप्रसिद्धानि व्याख्यानानि एवं सन्ति –

1. श्रीधरस्वामिविरचिता भावार्थदीपिका।
2. श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः । (श्रीधरस्वामिकृतः भावार्थदीपिकाया व्याख्यानम्)
3. श्रीराधारमणगोस्वामिप्रणीता दीपिनी।
4. श्रीवीरराघवाचार्यविरचिता भागवतचन्द्रिका।
5. श्रीविजयध्वजतीर्थलिखिता पदरत्नावली।
6. श्रीमज्जीवगोस्वामिकृता वैष्णवतोषणी क्रमसन्दर्भश्च इति द्वौ व्याख्यानौ।
7. श्रीमद्विश्वनाथचक्रवर्तिविरचिता सारार्थदर्शिनी।
8. श्रीमच्छुकदेवविरचितः सिद्धान्तप्रदीपः।
9. श्रीमद्वल्लभाचार्यरचिता श्रीसुबोधिनी।
10. श्रीपुरुषोत्तमचरणगोस्वामिकृतः सुबोधिनीप्रकाशः । (वल्लभाचार्यकृतसुबोधिनी-व्याख्यानः)
11. गोस्वामि श्रीगिरिधरलाललिखिता बालप्रबोधिनी।
12. श्रीप्रभुचरणविरचिता श्रीटिप्पणी।
13. श्रीमद्दीक्षितलालुभट्टयोजित श्रीसुबोधिनीयोजना।
14. मधुसूदनसरस्वतिकृता गूढार्थदीपिका। इत्यादि।

**श्रीवेदस्तुतेः व्याख्याः**

सोऽयं 'वेदस्तुतिः' वैदान्तजिज्ञासूनां भक्तजनानां कृते महदुपकाराय भवतीति बहुभिर्वेदान्तविद्वांसैः विविधव्याख्यानैः टीकाभिः समलङ्कृता । टीकासम्पत्तिर्दृष्ट्या वेदस्तुतिरग्रगण्या वर्तते । कालानुक्रमे विभिन्नवैष्णवविद्वांसाः स्वस्वमत-सम्प्रदायानुसारेण ग्रन्थमयमुद्दिश्य विविधव्याखाटीकाभाष्याणि आरचितवन्तः। प्रस्तुतं वेदस्तुतेः विंशत्यधिकाः व्याख्याः टीकाश्च समुपलभ्यन्ते । तत्र प्रधानव्याख्यायाः परिचयं विवरणञ्चात्र कृतम् –

**1. श्रीधरस्वामिकृतभावार्थदीपिका:** श्रीमद्भागवतान्तर्गतं वेदस्तुतेरत्यन्तं सुप्रसिद्धं प्राचीनञ्च व्याख्यानमिदं भावार्थदीपिका इति। कळिंगदेशीयः नृसिंहभगवतो-पासकः श्रीधरस्वामिना कृतमेतद्भाष्यं सर्वेषु व्यख्यानेषु मूर्धन्यः वर्तते। उक्तं यत्–

> व्यासो वेत्ति शुको वेत्ति राजा वेत्ति न वेत्ति वा।
> श्रीधरः सकलं वेत्ति श्रीनृसिंहप्रसादतः ।।

इति लोके सुप्रसिद्धम् । श्रीधरस्य कालमानं क्रि.श. १४ शतमानम् । श्रीधरस्वामिना काश्यामारचितमिदं अद्वैतमतपरं श्रीमद्भागवतभाष्यं सर्वेषु संप्रदायेष्वपि बहुमान्यता प्राप्तोऽस्ति।

**2. श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:** श्रीधरस्वामिकृतभावार्थदीपिका-व्याख्यानस्य टीकग्रन्थमिदम् । टीकाकारः श्रीवंशीधरमधिकृत्य तस्य स्थलं-कालं-जीवनादिकं किमपि न ज्ञायते।

**3. श्रीजीवगोस्वामिकृतवैष्णवतोषिणी:** श्रीजीव गोस्वामी (१५१३-१५९८) गौडीय वैष्णवसंप्रदायस्य प्रधानाचार्यः दार्शनिकश्च । श्रीचेतन्यमहाप्रभूणां साक्षात् शिष्यः श्रीजीवगोस्वामिभिः वैष्णवपरकमनेके ग्रन्थाः व्याख्याः टीकाश्च विरचिताः । तत्र तेन श्रीमद्भागवतस्योपरि वैष्णवतोषिणी-क्रमसन्दर्भः-बृहत्क्रमसन्दर्भश्चेति बहुप्रसिद्धाः व्याख्यानाः रचितमस्ति।

**4. सुदर्शनसूरिकृतशुकपक्षीयम्:** विशिष्टाद्वैतमतीयः सुदर्शनसूरेः कालं क्रि.श. १४ इति निश्चितम्। तेन कृतमिदं व्याख्या भागवतस्य व्याख्यानग्रन्थयोर्मध्ये अतिसंक्षिप्तम् । द्रविडदेशे तमिळुनाडुप्रान्तीयः श्रीसुदर्शनसूरिः विशिष्टाद्वैत-मतस्य संस्थापकः श्रीरामानुजाचार्यस्य दार्शनिकग्रन्थानां सुप्रसिद्धः टीकाकारः । श्रीरामानुजाचार्यकृतं श्रीभाष्यस्य 'श्रुतप्रकाशिका' इति टीकापि सुदर्शनसूरिना लिखितमस्ति।

**5. वीरराघवकृतभगवच्चन्द्रचन्द्रीका:** श्रीवीरराघवः शुकपक्षीयव्याख्यानकर्तृः श्रीसुदर्शनसूरेः साक्षाच्छिष्यः । एतदपि व्याख्यानं विशिष्टाद्वैतमतसिद्धान्ता-नुसारी वर्तते।

**6. विजयध्वजकृता पदरत्नावली:** श्रीविजयध्वजः मध्वमतानुयायी विद्वांसः । तस्य कालमानं क्रि.श. १६ शतमानमिति वदन्ति इतिहासज्ञाः । द्वैतमतसंस्थापकः श्रीमध्वाचार्यस्य 'भागवततात्पर्यनिर्णय'मिति ग्रन्थाधारेण द्वैतसिद्धान्तानुसारि-व्याख्यानमिदं विरचितमिति विजयध्वजेणोक्तम्[vii]।

**7. श्रीनाथचक्रवर्तिकृतचैतन्यमतमञ्जूषा:** वंगदेशस्थः कविकर्णपुरस्थलीयः श्रीनाथचक्रवर्तिः । सः चैतन्यमहाप्रभुसमकालीनेति केचन विदुषाणां मतम्। यथा नामधेयोक्तं गौडीय वैष्णवसंप्रदायानुसारी व्याख्यानमिदं चैतन्य-मतमञ्जूषा।

**8. विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी:** विश्वनाथचक्रवर्तिरपि गौडीय वैष्णव-संप्रदायानुसारी

चैतन्यमतानुयायी प्रमुखः विद्वांसः। तस्य कालमानं क्रि.श. १८ शतमानमिति ज्ञायते। श्रीधरस्वामिनः, प्रभुचैतन्यस्य तथ तस्य गुरोर्व्याख्यानानि तेन सारबद्धकृतमिदं व्याख्यानेति विश्वनाथेन उक्तम्[viii]। तस्मदेव व्याख्यानस्य नामकरणं 'सारर्थदर्शिनी'ति वर्तते।

**9. गूढार्थदीपिनी:** एतद् व्याख्यायाः कर्तृः कालेत्यादिविषये किञ्चिदपि न ज्ञायते।

**10. शुकदेवकृतसिद्धान्तप्रदीपः** श्रीशुकदेवः निम्बार्कमतानुयायी विद्वांसः। तेन द्वैताद्वैतमतसिद्धान्तरीत्या सिद्धान्तप्रदीपः व्याख्यानमारचितमस्ति।

**11. वल्लभाचार्यकृतसुबोधिनी:** क्रि.श. १६ शतकस्य प्रमुखः वैष्णवाचार्यः श्रीवल्लभाचार्यः। सः पुष्टिभक्तिमार्गस्य प्रवर्तक इति सुप्रसिद्धः। तेन वेदस्तुतिमुद्धिश्य सुबोधिनीव्याख्यानं शुद्धाद्वैतसिद्धान्तमनुसृत्या विरचितम्। एतद् व्याख्याने वल्लभाचार्येण श्रीमद्भागवतस्य सुविख्यातः टीकाकारः श्रीधरस्वामिनः खण्डनं कृतमस्ति।

**12. पुरुषोत्तमचरणगोस्वामिकृतसुबोधिनीप्रकाशः** एतद् व्याख्यानाय सुबोधिनी-सारः इति नामान्तरमप्यस्ति। श्रीवल्लभचार्यस्यानुयायी पुरुषोत्तमचरण-गोस्वामिना शुद्धाद्वैतसिद्धान्तानुसारमेतद् टीका लिखितम्।

**13. श्रीगिरिधरलालगोस्वामिकृता बालप्रबोधिनी:** श्रीगिरिधरलालगोस्वामिना विरचितम् अयं व्याख्यानमपि वल्लभाचार्यसंप्रदयानुसारि शुद्धाद्वैतमत-प्रतिपादकमस्ति। व्याख्याकारस्य पितुः गोपालः इति ग्रन्थपुष्पिकायामुक्तम्।

**14. गंगासहायप्रणीत अन्वितार्थप्रकाशिका:** क्रि.श. १९ शतमानस्य वैष्णवपण्डितः श्रीगंगासहायेन विरचितमिदं व्याख्यानम्।

**15. गोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका:** एतद्भाष्यकारस्य विषयेऽपि अधिकं न ज्ञायते। कर्तृः शुद्धैकान्तधर्मप्रवर्तकः श्रीसहजानन्दस्वामिशिष्यः।

**16. भगवत्प्रसादाचार्यकृता भक्तमनोरञ्जनी:** श्रीस्वामिनारायणमतानुसारि-व्याख्यानं भगवत्प्रसादाचार्येण कृतमिदं भक्तरञ्जनी अथवा भक्तमनोरञ्जनी। ग्रन्थोक्तरीत्या कर्त्रोः पितुर्नाम श्रीरघुवीराचार्यः।

**17. योगिरामानुजाचार्यकृतसरला:** क्रि.श. १९ शतमानस्य वैष्णवाचार्यः श्रीयोगि-रामानुजेन कृतं वेदस्तुतेः सरलाव्याख्या। एतद् व्याख्यानमतीव विस्तृता श्रीरामानुजाचार्यमतानुसारी च। कर्तृः श्रीवृन्दावनवासि इति ज्ञायते।[ix]

**18. श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी:** वेदस्तुतेः श्रीधरस्वामिनः भावार्थदीपिकायाः व्याख्यानमिदं श्रीराधारमणदासगोस्वामिना लिखतम्। कर्त्रोः चैतन्यदास इति नामान्तरमप्यस्ति। ग्रन्थस्य पुष्पिकायामुक्तरीत्या तस्य पितुः गोवर्धनलालः।

**19. श्रीनिवाससूरिकृततत्त्वदीपिका:** वेदस्तुतेः श्रीनिवाससूरिणा प्रणीतं व्याख्यानं तत्त्वदीपिका। ग्रन्थस्य पुष्पिकाधारेण एषः द्रविडदेशीयः इति ज्ञायते।[x]

## उपसंहार

पुराणश्रेष्ठमिति सुविख्यातं श्रीमद्भागवतं भक्ताजनानां नितरां अतिप्रियतमं भवति। अत्र ज्ञानवैराग्यभक्तिभिः तत्त्वसिद्धान्ताः सुष्टु प्रकटीकृतमस्ति। यस्तावत् भक्त्या पुराणमिदं श्रुणोति अथवा पठति स मुक्तो भवतीत्यत्र न संशय इति विविधपुराणोक्तिः।

श्रीभागवतस्य माहात्म्यमेवं वर्णितमस्ति स्कान्दपुराणे –

> श्रीमद्भागवतस्याऽपि श्रीमद्भगवतस्सदा।
> स्वरूपमेकमेवास्ति सञ्चिदानन्दलक्षणम्॥[xi]

एवमन्यथा च बहुधा श्लाघ्यमानं सुश्रेष्ठमिदं श्रीभागवतं पुराणं यदि न श्रूयते जनः कृतात्मघातो भवतीति भागवतविमुखो निन्द्यते। एवं सर्वशास्त्रार्थसारमिदं भागवतपुराणं बहुभिः योगिभिः प्रशस्यं भवति। कश्चित्कवि इदम्पुराणस्य वैशिष्ट्यमेवं वर्णयति – "वेदाः प्रभुसम्मिताः, पुराणानि तु सुहृत्सम्मितानि, काव्यानि च कान्तासम्मितान" वर्ण्यन्ते। परन्तु इदं पुराणं पूर्वोक्तत्रिविधोपदेशप्रकाशकं सत् पुराणान्तराण्यतिशेते' इति –

> वेदाः पुराणं काव्यञ्च प्रभुमित्रं प्रियेव च।
> बोधयन्तीति हि प्राहुः त्रिवत् भागवतं पुनः॥

एवं क्वचित्मित्रसम्मितमार्गेण क्वचित्प्रभुसम्मितरीत्या कुत्रचित्कान्ता-सम्मितपद्धत्या च विषयाः भक्तजनहृदयलग्ना सुष्टु भवन्ति श्रीमद्भागवतपुराणे। श्रीमद्भागवते भक्तितत्त्वस्याधिक्यमस्ति। अत्र भक्तितत्त्वं सप्रकारं

साङ्गोपाङ्गं च सविस्तरं प्रतिपाद्यते । तस्मादेव भक्तिमार्गानुयायिनामेतद् पुराणं कल्पवृक्षमिति ख्यातम् ।

## उपयुक्तग्रन्थसूची


1. ब्रह्मसूत्र, उपनिषद एवं श्रीमद्भागवत, डाँ.वासुदेवकृष्ण चतुर्वेदी, श्रीकृष्ण सत्संग भवन प्रकाशन, मथुरा, 1984-85.
2. मानव-जीवन और भागवत धर्म, स्वामी अखण्डानन्द सरस्वती, सत्साहित्य प्रकाशन ट्रस्ट, मुम्बई, 1971.
3. भागवतस्तुति संग्रह, भाषानुवाद, कथाप्रसंग और शब्दकोष सहित, पं.नित्यानन्द पाणडेय, गीताप्रेस, गोरखपुर, 1994.
4. पुराण-विमर्श, आचार्य बलदेव उपाध्याय, चोखम्बा विद्याभवन, वाराणसी, 1978.
5. पुराण सौरभम्, प्रो.मिनतिरथ, शतरूपा पब्लिकेसन्स, पुरी, 2016.
6. पुराणदिग्दर्शनम्, श्री पं.माधवाचार्य शास्त्रि, माधव पुस्तकालय, देहली.


## टिप्पणी

[i] स्कान्दपुराणम्, वै.खण्डे, भागवतमाहात्म्ये 4.39.48

[ii] विष्णुपुराणम्, 6.5.74

[iii] भागवतम्, 5.73-74

[iv] पद्मपुराणम् ।

[v] भागवतम्, 2.7.51

[vi] भागवतम्, 3.4.11-13

[vii] आनन्दतीर्थविजयतीर्थौ प्रणम्य मस्करिवरवन्द्यौ ।
तयोः कृर्तिं स्फुटमुपजीव्यं प्रवच्मि भागवतं पुराणम् ।।

[viii] श्रीधरस्वामिनां श्रीमत्प्रभुणा श्रीमुखाद् गुरोः ।
व्यख्यासु सरग्रहणादियं सारार्थदर्शिनी ।। (पुष्पिका)

[ix] योगिरामानुजार्येण श्रीवृन्दावनवासिना ।
व्याख्या वेदस्तुतेरेषा श्रीकृष्णचरणेऽर्पिता ।।

[x] “इति श्रीमद्भागवते दशमस्कन्धे श्रीगोवर्धनकृतवासश्रीवेङ्कटाचार्यदासदासेन श्रीनिवासदासेन विरचिता वेदस्तुतिव्याख्यायां सप्ताशीतितमोऽध्यायः ।।”

[xi] स्कन्दपुराणम् । भागवतमाहात्म्यम् ।